श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीभृगुसंहितोक्त

# ॥ श्रीसुदर्शन कवचम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीसुदर्शन कवचम् ॥

प्रसीद भगवन् ब्रह्मन् सर्वमन्त्रज्ञ नारद !।
सौदर्शनं तु कवचं पवित्रं ब्रूहि तत्वतः ॥ 1 ॥

नारद उवाच
शृणुष्वेह द्विजश्रेष्ठ ! पवित्रं परमाद्भुतम्।
सौदर्शनं तु कवचं दृष्टाऽदृष्टार्थसाधकम् ॥ 2 ॥

कवचस्यास्य ऋषिर्ब्रह्मा छन्दोऽनुष्टुप्तथा स्मृतम्।
सुदर्शनमहाविष्णुर्देवता संप्रचक्षते ॥ 3 ॥

ह्रां बीजं शक्ति रत्रोक्ता ह्रीं क्रों कीलकमिष्यते।
शिरस्सुदर्शनः पातु ललाटं चक्रनायकः ॥ 4 ॥

घ्राणं पातु महादैत्यरिपुरव्यात् दृशौ मम।
सहस्रारश्श्रुतिं पातु कपोलं देववल्लभः ॥ 5 ॥

विश्वात्मा पातु मे वक्त्रं जिह्वां विद्यामयो हरिः।
कण्ठं पातु महाज्वालः स्कन्धौ दिव्यायुधेश्वरः ॥ 6 ॥

भुजौ मे पातु विजयी करौ कैटभनाशनः।
षट्कोणसंस्थितः पातु हृदयं धाम मामकम् ॥ 7 ॥

मध्यं पातु महावीर्यः त्रिणेत्रो नाभिमण्डलम्।
सर्वायुधमयः पातु कटिं श्रोणिं महाद्युतिः ॥ 8 ॥

सोमसूर्याग्निनयनः ऊरू पातु च मामकौ।
गुह्यं पातु महामायो जानुनी तु जगत्पतिः॥ **9** ॥

जङ्घे पातु ममाजस्रं अहिर्बुध्न्यः सुपूजितः।
गुल्फौ पातु विशुद्धात्मा पादौ परपुरञ्जयः॥ **10** ॥

सकलायुधसंपूर्णो निखिलाङ्गं सुदर्शनः।
य इदं कवचं दिव्यं परमानन्ददायिनम्॥ **11** ॥

सौदर्शनमिदं यो वै सदा शुद्धः पठेन्नरः।
तस्यार्थसिद्धिर्विपुला करस्था भवति ध्रुवम्॥ **12** ॥

कूश्माण्डचण्डभूताद्याः ये च दुष्टा ग्रहास्स्मृताः।
पलायन्तेऽनिशं भीताः वर्मणोऽस्य प्रभावतः॥ **13** ॥

कुष्ठापस्मारगुल्माद्याः व्याधयः कर्महेतुकाः।
नश्यन्त्ये तन्मन्त्रिताम्बुपानात् सप्तदिनावधि॥ **14** ॥

अनेन मन्त्रितां मृत्स्नां तुलसीमूलसंस्थिताम्।
ललाटे तिलकं कृत्वा मोहयेत् त्रिजगन्नरः।
वर्मणोऽस्य प्रभावेन सर्वान्कामानवाप्नुयात्॥ **15** ॥

॥ इति श्रीसुदर्शनकवचं समाप्तम्॥